# संस्कृतवार्ता:

दिनाङ्क :- 15.02.2025 सायम् - 06:20

इयम् आकाशवाणी

सम्प्रति वार्ताः श्रूयन्ताम्

<u>आदौ मुख्यवार्ताः</u>

- राष्ट्रपतिपदासीना द्रौपदीमुर्मु: अवोचत् यत्, केन्द्रप्रशासनम् उच्चशिक्षायाम् ए आई इत्यस्य एकीकरणाय सक्रियतया उपायान् करोति।
- काशी-तमिल-सङ्गमम् इत्यस्य तृतीयं संस्करणम् वाराणसी-नगरे आरभते, अनेन हि सांस्कृतिक-बौद्धिक-सम्बन्धा: प्रवर्धन्ते।
- केन्द्रीय-सतर्कतायोगः दिल्ली-नगरस्य पूर्वमुख्यमन्त्रिणः अरविन्द-केजरीवालस्य निवासस्य नवीकरणस्य कथित-अनियमिततानां विषये अन्वेषणस्य आदेशं दत्तवान्।
- अमेरिका-देशस्य सैन्यबलं, सेनायां समलैंगिक-जनानाम् नियुक्तिं प्रतिनिषिद्धवत् ।
- एथलेटिक्स्-क्रीडायां गुलवीर् सिङ्ह: बोस्टन्-नगरे डेविड्-हेमेरी-इन्विटेषनल्-मीट् इत्यस्यां त्रिसहस्रमीटर-परिमित-स्पर्धायां राष्ट्रिय-कीर्तिमानं भङ्गं कुर्वन् रजतपदकं प्राप्तवान्।

---

<u>झारखण्डं-राष्ट्रपति:</u>

राष्ट्रपतिपदासीना द्रौपदी मुर्मु: प्रावोचत् यत् केन्द्रप्रशासनं कृत्रिमबुद्धिमत्ताम् उच्चशिक्षायां सम्मिलितुं पदक्षेपम् उत्थापयति। रांची नगरस्य मेसरा इत्यत्र अद्य बिरला-इन्स्टीट्यूट ऑफ टेक्नोलॉजी इत्येतस्य सप्ततिवर्षाणां जयन्त्यवसरे कार्यक्रमं सम्बोधयन्ती राष्ट्रपति: अवदत् यत भविष्यकाले कृत्रिमबुद्धिमत्ताया: प्रभावेन बृहत्तमं परिवर्तनम् आगमिष्यति।

राष्ट्रपतिना अग्रे निगदितं यत् विकसित भारतस्य निर्माणे यूनाम् उत्साह: प्रतिबद्धता च महत्वपूर्णां भूमिकां निभालयिष्यति। अपि च एतदर्थम् अन्वेषकै: उद्यमिभि: च परम्परागत-समुदायानां ज्ञानं नैव अनवधातव्यम् ।

महिलानां शक्तिकरणदिशि राष्ट्रपति: निगदितवती यत् बालिकानां विज्ञान-प्रौद्योगिकी-अभिय◌ान्त्रिक-गणित-सदृशेषु क्षेत्रेषु सहभागित्वं विद्यते। अत्रावसरे राज्यपाल: सन्तोषकुमार-गङ्गवार: अपि कार्यक्रमम् एनं सम्बोधितवान्। असौ अकथयत् यत् नवीने भारते शिक्षाक्षेत्रे बालिकानां प्रदर्शनं बालकेभ्य: विशिष्टम् अद्भुतं च◌ास्ति।

---------------------------------------------

## योग-तमिल सङ्गमम्

तमिलनाडु-काशीनगरयो: च मध्ये सांस्कृतिकं बौद्धिकं च सम्बन्धं प्रवर्धमानं काशी-तमिल-सङ्गमम् तृतीयं संस्करणम् अद्य उत्तरप्रदेशस्य वाराणस्याम् आरभत। केन्द्रीयमन्त्री धर्मेन्द्र प्रधान: डॉ एल मुरुगन: मुख्यमन्त्री योगी आदित्यनाथ: च कार्यक्रमस्यास्य उद्घाटनम् अकार्षु:।

---------------------------------------------

## केजरीवाल:

केन्द्रीय-सतर्कतायोगेन षष्ठ इत्यभिनामधेयकस्य फ्लैगस्टाफ-रोड भवनस्य निर्माणे नवीनकरणे च अनियमितताया: आरोपाणां निरीक्षणाय आदेश: प्रख्यापित:। आम-आदमी-पार्टीति दलस्य संयोजक: अरविन्दकेजरीवाल: दिल्ल्या: मुख्यमन्त्रिरूपेण निवसन् आसीत्। आयोगेन भारतीय-जनता-पार्टी दलस्य वरिष्ठ नेतु: रोहिणीत: विधायकस्य विजेन्द्रगुप्ता इत्येतस्य परिवेदनायां केन्द्रीय-लोक-निर्माण-विभागाय निरीक्षणार्थं आदेश: प्रदत्त:।

वार्ताहरैः सह संलापे श्रीगुप्ताः कथितवान् यत् आयोगेन तथ्याधारिते परिवेदनायां संज्ञानम् गृहीतम्।

---------------------------------------------

<u>अमेरिककिय सैन्य बलं</u>

अमरीकीयसैन्यबलं प्रबलतया अघोषयत् यत् इदानीं समलैंगिक-जनान् सेनायां नामाङ्कनं कर्तुं न अनुमन्यते, लिङ्ग-संक्रान्ति-प्रक्रिया अपि न प्रदत्ता भविष्यति इति। सामाजिक-सन्देश-पटले अमरीकीयसैन्यबलं प्राथयत् यत् 'जेण्डर डिस्फोरिया' इत्यनेन पीडिताः जनाः राष्ट्रस्य सेवायाम् इच्छुकानां कृते सम्मानेन आदरेन च व्यवहृताः भविष्यन्ति इति। लिङ्ग-समर्थन-परिचर्या अनिर्दिष्टकालं यावत् स्थगिता भविष्यति इति सेना अवोचत्। जनवरीमासे सप्त विंशति दिनाङ्के राष्ट्रपतिना डोनाल्ड् ट्रम्प् इत्यनेन हस्ताक्षरितस्य कार्यकारी-आदेशस्य अनन्तरम् नीति-परिवर्तनं जातम्, यस्मिन् समलैंगिक-जनान् सशस्त्रसेनायां प्रवेष्टुं निषेधः कृतः, तथा च त्रिंशत्दिवसेषु समलैंगिक-सेवा-सदस्यानां कृते नीतिं निर्धारयितुं पेण्टगान्-इति संस्थायै निर्देशः दत्तः।

---------------------------------------------

<u>*सम्प्रति महाकुम्भसम्बद्धाः वार्ता श्रूयन्ताम्-*</u>

<u>*प्रयागराजे महाकुम्भे श्रद्धालूनां बृहत्मानां संख्याम् अन्वीक्ष्य उत्तरप्रदेश-परिवहन-निगमः अग्रिमेषु त्रिषु दिवसेषु सार्धद्विशतोत्तर-द्विसहस्र सङ्ख्यकानां बसयानानां प्रचालनस्य घोषणां कृतवान्। अद्य प्रायशः त्रिसप्ततिलक्षाधिक जनाः सङ्गमे पवित्रे स्नानं समाचरितवन्तः महाकुम्भाय अद्य श्वः च बृहत्तमायां सङ्ख्यायां श्रद्धालूनां आगमनस्य सम्भावना वर्तते। एतदर्थं अनेकानि अतिरिक्त-बसयानानि प्रचाल्यन्ते।*</u>

*उत्तरप्रदेशस्य परिवहनमन्त्री दयाशङ्कर सिंहः निर्दिष्टवान् यत् प्रयागराजस्थ विविधेषु अस्थायि-बस-स्थानकेषु अधिकारिणां दायित्वं एतदर्थं सुनिश्चितं भविष्यति येन हि लोकयानानां सञ्चालनं सुचारूरीत्या भवितुं शक्यते। अत्रावधौ प्रयागराज सङ्गम रेलवे स्थानकं अद्य श्वः च विहितं भविष्यति। संस्कृतवार्ताकक्षतः निधिः तिवारी।*

---------------------------------------------

**प्रधानमन्त्री-भारत टेक्स**

प्रधानमन्त्री नरेन्द्रमोदी श्वः नवदिल्ल्याः भारतमण्डमे पञ्चविंशत्यधिकद्विसहस्रतमवर्षस्य **भारत टेक्स** इत्यस्य कार्यक्रमे भागं गृह्णीयात्। अवसरेऽस्मिन् सः सभां सम्बोधयिष्यति। भारत-टेक्स इति विशिष्ट- वैश्विककार्यक्रमः अस्य वर्षस्य फरवरीमासस्य चतुर्दशदिनाङ्कात् आरभ्य सप्तदशदिनाङ्कं यावत् भविष्यति।

---------------------------------------------

**प्रधानमन्त्री-सीतारामन**

प्रधानमन्त्री नरेन्द्रमोदी अद्य समुदीरितवान् यत् वित्तमन्त्रिपदासीना निर्मलासीतारामन् इत्येषा साम्प्रतिके एव समये संसदि स्वभाषणावधौ भारतीयार्थव्यवस्थयाः स्पष्टं चित्रं प्रस्तुतवती। प्रधानमन्त्रिणा एकस्मिन् सामाजिकसन्देशेपटले केन्द्रीयार्थसंकल्पनासत्रस्य आयकरविधेयकस्य च प्रस्तुतौ संसदि वित्तमन्त्रिणः भाषणं विनिमयीकृतम्।

---------------------------------------------

**परीक्षा पे चर्चा कार्यक्रमः**

परीक्षा पे चर्चा इत्येतस्य परीक्षा-सम्बद्ध-कार्यक्रमस्य पञ्चमे संस्करणं छात्रान् मस्तिष्कगतचमत्कारम् अवबोधयति। अद्य कार्यक्रमस्य एकस्मिन् भागे प्रसिद्धः आध्यात्मिक नेता सद्गुरूः शिक्षणं क्रीडारूपं कर्तुं समन्वययुतं जीवन्तं च मनसः पोषणं कर्तुं च अन्तादृष्टिं

विनिमयीकृतवान्। परीक्षायां ध्यानं वर्धयितुम् उत्कृष्टतां च प्राप्तुं प्रबलमनस्कताया: कृते तन्त्राणि सहभागयन्त: सद्गुरू: छात्रान् स्वबुद्धिं गतिशीलरूपेण स्थापयितुं पृष्टवान्।

---------------------------------------------

## सीबीआई

केन्द्रीयान्वेषण-विभाग: आन्तर्जालिकापराध-प्रकरणस्य विषये दिल्ली हरियाणा-प्रदेशयो: एकादशस्थानेषु सहसान्वेषणं चकार। सहसान्वेषणे एककोटिरुप्यकाणि, एकसहस्र-विदेशीय मुद्रा समेतय स्वर्णं प्राप्तम्। सी.बी.आई इति सूचयामास यत् अभियुक्ता: सर्वकारीय-अधिकारिणां वेशेण अवैध कार्येषु संलग्ना: आसन्।

---------------------------------------------

## प्रयागराज -दुर्घटना

गतरात्रौ उत्तरप्रदेशस्य प्रयागराजजनपदे कारयान-बसयानयोर्मध्ये अभिकर्षणे दश जना: मृत्युमपगता:, अन्ये नवदशजना: व्रपिता: अभवन्। प्रयागराजनगरस्य आरक्षकायुक्त: तरुण: गाबा इत्येष: अवोचत् यत् कारयानं छत्तीसगढस्य कोर्बा-नगरात् प्रयागराजं प्रति आगच्छद् आसीत्। राष्ट्रपति: द्रौपदी मुर्मु: एकस्मिन् सामाजिक-अन्तर्जालीय-पटले दुरापन्नायां दुर्घटनायां मृतकानां कुटुम्बकेभ्य: शोकं प्रकटितवती, सममेव व्रणितानां जनानां शीघ्र-स्वस्थस्य कामनां कृतवती।

---------------------------------------------

## भारतस्य गुल्वीर सिंह

भारतस्य गुलवीर सिंह: बोस्टन्-नगरे डेविड् हेमेरी इन्विटेषनल् मीट् इत्यस्याम् पुरुषाणां त्रिसहस्र मीटर्- आभ्यन्तर -स्पर्धायां सप्तदश वर्षीयं राष्ट्रिय क्रीर्तिमानं विरच्य इतिहासं

निर्ममे। सप्तनिमेषेषु अष्टत्रिंशत्-क्षणेषु स्पर्धां समाप्य गुलवीर: न केवलं रजतपदकम् आप्नोत् अपि तु सुरेन्द्रसिङ्घस्य पूर्वतनस्य राष्ट्रिय-कीर्तिमानं अपि पारं कृतवान्।

---------------------------------------------

रांची-चैंपियनशिपस्पर्धा

चतुर्थ-दक्षिण-एशियाया: वरिष्ठ-अथ्लेटिक्स्-च्यम्पियन्शिप् इतिक्रीडाया: आयोजनं रांची-नगरस्य बिरसा-मुण्डा-अथ्लेटिक्स्-क्रीडाङ्गणे मई-मासस्य तृतीय दिनाङ्कारभ्य पञ्चदिनाङ्कं यावत् भविष्यति। सूचना इयं श्रीलङ्का-एथेलेटिक्स्-फेडरेशन इति संस्थया एकस्मिन् सामाजिक- अन्तर्जाल-पटले प्रदत्ता।

क्रीडायामस्यां भारत-श्रीलङ्का-पाकिस्तान-बाङ्गलादेश-नेपाल-भूटान-मॉलदीवइत्येता: देशा: प्रतिस्पर्धिन: भागं गृह्णीयु:।

---------------------------------------------

क्रिकेट

महिला प्रीमियर लीग क्रिकेट स्पर्धायां अद्य सार्ध सप्त वादने वडोदरायां मुम्बई इंडियन्सदलस्य स्पर्धा दिल्ली कैपिटल्स दलस्य साकं भविता। स्पर्धाया: प्रथमे चरणे एव गतरात्रौ वडोदरायां रॉयल चैलेन्जर्स बेंगलुरू दलेन गुजरात जायंट्स दलं षड् स्तोभै: पराजितम्।

।। इति वार्ता:।।